श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

सुण्डपालयं श्रीरामभद्राचार्य विरचितम्

# ॥ श्री श्रीनिवासमहादेशिक (पॆरियाण्डवन्) मङ्गळम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री श्रीनिवासमहादेशिक (पॆरियाण्डवन्) मङ्गळम् ॥

ज्ञानानुष्ठानवैराग्यशेवधिः श्रितवत्सलः।
श्रीनिवासयतीन्द्रो मे सन्निधत्तां सदा हृदि॥

वेदमार्गप्रतिष्ठात्रे वेदान्तज्ञानशालिने।
श्रीनिवासयतीन्द्राख्यदेशिकायास्तु मङ्गलम्॥ 1 ॥

परवादीभसिंहाय परिव्राजकभूभृते।
सर्वतन्त्रस्वतन्त्राय सर्वज्ञायास्तु मङ्गलम्॥ 2 ॥

द्रमिडोपनिषत्सारज्ञात्रे विद्वत्सुरद्रवे।
विख्यातवैभवायास्तु देशिकेन्द्राय मङ्गलम्॥ 3 ॥

श्रीभाष्यकारसिद्धान्तमहोदधिसुधांशवे।
वेदान्ताचार्यसिद्धान्तवर्धकायास्तु मङ्गलम्॥ 4 ॥

रहस्यत्रयसारादिग्रन्थसारस्य वेदिने।
राजीवसमनेत्राय यमिराजाय मङ्गलम्॥ 5 ॥

प्रपत्तिशास्त्रसारं य एको वेत्ति महीतले।
प्रपन्नार्तिहरायास्तु तस्मै बहुलमङ्गलम्॥ 6 ॥

नाथश्श्रीयामुनाचार्यो यश्च श्रीलक्ष्मणाह्वयः।
तन्मुनित्रयसिद्धान्तस्थापकायास्तु मङ्गलम्॥ 7 ॥

रङ्गेशपदिवेदान्तलक्ष्मणाह्वययोगिना।
समर्पितभरायास्तु सत्वोद्रिक्ताय मङ्गलम्॥ **8** ॥

यः कुम्भमासि पुष्यर्क्षे ह्यवतीर्णश्शुभान्विते।
तस्मै श्रीश्रीनिवासाख्यदेशिकेन्द्राय मङ्गलम्॥ **9** ॥

शठजिच्छ्रीभाष्यकारो यश्च वेदान्तदेशिकः।
तदाचार्यत्रयांशाय तस्मै श्रेष्ठाय मङ्गलम्॥ **10** ॥

यतीन्द्रश्रीश्रीनिवासरामानुज गुरूत्तमात्।
अवाप्तसकलार्थाय गुरवे भूरिमङ्गलम्॥ **11** ॥

ज्ञानभक्तिविरक्त्यादिकल्याणगुणशालिने।
ज्ञानप्रदानोत्कण्ठाय तस्मै नाथाय मङ्गलम्॥ **12** ॥

धृतत्रिदण्डहस्ताय सूर्ध्वपुण्ड्रविशोभिने।
शुभ्रश्रीयज्ञसूत्राय तस्मै शुद्धाय मङ्गलम्॥ **13** ॥

यस्यानुकम्पया मन्दोऽप्यद्धा व्याकृतिकृद्भवेत्।
श्रीवासदेशिकेन्द्राय तस्मै भवतु मङ्गलम्॥ **14** ॥

तद्देशिककृपाभूम्ना श्रीरामकविनिर्मितम्।
तन्मङ्गलं सुपठतां मङ्गलं भवति ध्रुवम्॥ **15** ॥

वेदशीर्षरसज्ञाय वेदान्ताचार्यभक्तये।
श्रीनिवासयतीन्द्राख्य देशिकाय नमो नमः॥ **16** ॥

॥ इति श्री श्रीनिवासमहादेशिक मङ्गळं समाप्तम्॥